परिभ्रमंस्तत्र न विन्दतेऽर्थान्
मायामये वासनया शयानः ॥" )
ज्ञानम् । इति मेदिनी । ने, १३० ॥ स्मृतिहेतुः । तत्पर्य्यायः । संस्कारः २ भावना ३ । इति जटाधरः ॥ देहात्मबुद्धिजन्यमिथ्यासंस्कारः । इति न्यायशास्त्रम् ॥ दुर्गा । यथा,—
"वसत्यहस्ता सर्व्वेषु भूतेष्वन्तर्हिताय च ।
धातुर्व्वस निवासेति वासना तेन सा स्मृता ॥"
इति देवीपुराणे ४५ अध्यायः ॥
( अर्कस्य भार्य्या । यथा, भागवते । ६।६।१३ ।
"अर्कस्य वासना भार्य्या पुत्त्रास्तर्षादयः
स्मृताः ॥" )

वासन्तः, पुं, ( वसन्ते भवः । वसन्त+"सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण् ।" ४।३।१६ । इति अण् । उष्ट्रः । इति मेदिनी । ते, १५२ ॥ कोकिलः । इति राजनिर्घण्टः ॥ मलयवायुः । मुद्गः । इति त्रिकाण्डशेषः ॥ कृष्णमुद्गः । इति हेमचन्द्रः ॥ मदनद्रुमः । इति शब्दमाला ॥ अवहिते, त्रि । इति मेदिनी । ते, १५२ ॥ ( वसन्तोऽपि च त्रि । इति सिद्धान्तकौमुदी । ४ । ३ । ४६ ॥ )

वासन्तकं, त्रि, वसन्तसम्बन्धि । वसन्तस्येदमित्यर्थे कण्प्रत्ययेन निष्पन्नम् ॥ ( वसन्ते उप्तम् । वसन्त+"ग्रीष्मवसन्तादन्यतरस्याम् ।" ४ । ३ । ४६ । इति वुञ् । ( वसन्तोऽपि, त्रि ॥ इति सिद्धान्तकौमुदी ॥ )

वासन्तिकः, त्रि, (वसन्तमधीते वेद वेति । वसन्त+"वसन्तादिभ्यष्ठक् ।" ४।२।६३। इति ठक् ।) विदूषकः यथा । वासन्तिकः केलिकिलो वैहासिको विदूषकः । इति हेमचन्द्रः ॥ ( वसन्तस्येदमिदि । "वसन्तात् च ।" ४ । ३ ।.२० । इति ठञ् । वसन्तसम्बन्धिनि, त्रि । यथा, भागवते । ५ । ६ । ५ ।
"सप्तश्वशिरस्त्रिपदां सावित्रीं ग्रैष्मवासन्तिकान् मासानधीयानमप्यसमवेतरूपं ग्राहयामास ॥" )

वासन्ती, स्त्री, (वसन्तस्येयमिति । वसन्त+अण् । ङीष् ।) माधवी । यूथी । इति मेदिनी । ते,१५२॥ (यथा, रामायणे । ४ । १ । ७१ ।
"मालतीमल्लिकापद्मकरवीराश्च पुष्पिताः ।
केतक्यः सिन्धुवाराश्च वासन्त्यश्च सुपुष्पिताः ॥")
पाटला । इति विश्वः ॥ कामोत्सवः । तत्पर्य्यायः । चैत्रावली २ मधूत्सवः ३ सुवसन्तः ४ काममहः ५ कर्द्दमी ६ । इति त्रिकाण्डशेषः ॥ गणिकारी । पुष्पलताविशेषः । तत्पर्य्यायः । प्रहसन्ती २ वसन्तजा ३ माधवी ४ महाजातिः ५ शीतसहा ६ मधुबहुला ७ वसन्तदूती ८ । अस्या गुणाः । शिशिरत्वम् । हृद्यत्वम् । सुरभित्वम् । श्रमहारित्वम् । धम्मिल्लामोदित्वम् । मन्दमदोन्मादनदायित्वञ्च । इति राजनिर्घण्टः ॥ नवमल्लिका । नेवारि इति हिन्दी भाषा । यथा,—
"नेपाली कथिता तज्ज्ञैः सप्तला नवमालिका ।
वासन्ती शीतला लघ्वी तिक्ता दोषत्रयास्रजित् ॥"
इति भावप्रकाशः ॥ * ॥
अथ वासन्तीदुर्गापूजाप्रमाणम् । तत्र भविष्यपुराणम् ।
"मीनराशिस्थिते सूर्य्ये शुक्लपक्षे नराधिप ।
सप्तमीं दशमीं यावत् पूजयेदम्बिकां सदा ॥"
भविष्योत्तरे ।
"चैत्रे मासि सिते पक्षे सप्तम्यादिदिनत्रये ।
पूजयेद्विधिवद्दुर्गां दशम्याञ्च विसर्ज्जयेत् ॥"
कालकौमुद्यां जावालिः ।
"चैत्रे मासि सिते पक्षे सप्तम्यादिदिनत्रये ।
पूजयेद्विविधैर्द्रव्यैर्नववस्त्रकुसुमैस्तथा ॥
नानाविधैश्च बलिभिर्म्मधुभेदैर्वृषध्वजैः ।
विचित्राभरणैः पाद्यैः पट्टवस्त्रादिभिस्तथा ॥
एवं यः कुरुते पूजां वर्षे वर्षे विधानतः ।
ईप्सितान् लभते कामान् पुत्त्रपौत्त्रादिकान्नृप ॥"
अत्र भविष्योत्तरे निरुपपदमासशब्दसङ्केतात् भविष्यपुराणवचने मीनराशिस्थित इति मीनस्थरव्यारब्धचान्द्रमासीयतिथिपरम् । सौररव्यारब्धत्वे कदाचित् सप्तम्यादितिथित्रयालाभात् तद्वर्षे तत्कृत्यलोपः स्यात् । न चेष्टापत्तिः भविष्यपुराणे सदापदोपादानात् जावालिवचने वर्षे वर्षे इत्युपादानाच्च नित्यत्वम् । एतदिष्टतं कालविवेके । एवं जावालौ शेषवचनपरार्द्धे पुत्त्रादिरूपफलश्रवणात् काम्यत्वञ्च । ततश्च काम्यतया पूजने कृते प्रसङ्गात् नित्यत्वसिद्धिः ।
"सिताष्टम्यान्तु चैत्रस्य पुष्पैस्तत्कालसम्भवैः ॥
अशोकैरपि यः कुर्य्यात् मन्त्रेणानेन पूजनम् ।
न तस्य जायते शोको रोगो वाप्यथ दुर्गतिः ॥"
इति कालिकापुराणवचनात् केवलाष्टमीकृत्य उक्तः । चैत्रमासमधिकृत्य ।
"नवम्यां पूजयेद्देवीं महिषासुरमर्द्दिनीम् ।
कुङ्कुमागुरुकस्तूरीधूपान्नध्वजतर्पणैः ।
दमनैर्मुरपत्रैश्च विजयाख्यपदं लभेत् ॥"
इत्यनेन केवलनवमीकृत्य उक्तः । अवस्था तु शारदीयपूजाप्रकरणोक्ता ग्राह्या । विशेषस्तत्र बोधनप्रक्रिया नास्ति बोधितायाः बोधनासम्भवात् । इति प्राक् विष्टनम् । होमादिकञ्च पूर्व्ववज्ज्ञेयमिति दिक् । इति दुर्गोत्सवविवेकः ॥*॥
अपि च ।
श्रीनारायण उवाच ।
"पुरा स्तुता सा गोलोके कृष्णेन परमात्मना ।
संपूज्य मधुमासे च प्रीतेन रासमण्डले ॥
मधुकैटभयोर्युद्धे द्वितीये विष्णुना पुरा ।
तत्रैव काले सा दुर्गा ब्रह्मणा प्राणसङ्कटे ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ६३ अध्यायः ॥
( चतुर्द्दशाक्षरवृत्तिविशेषः । इति छन्दोमञ्जरी । अस्या लक्षणादिकं छन्दःशब्दे द्रष्टव्यम् ॥ )

वासन्तीपूजा, स्त्री, ( वासन्ती तदाख्या पूजा । ) चैत्रमासीयदुर्गापूजा । यथा,—
"चैत्रे मासि सिते पक्षे नवम्यादिदिनत्रये ।
प्रातः प्रातर्महादेवीं दुर्गां भक्त्या प्रपूजयेत् ॥"
इति ॥
तत्राष्टम्यां अन्नपूर्णापूजा यथा,—
"तत्राष्टम्यामन्नपूर्णां पूर्व्वाह्ने साधकोत्तमः ।
रक्तवासैरक्तपुष्पैर्बलिभिः पूजयेच्छिवाम् ॥"
इति च मायातन्त्रे ७ पटलः ॥
अपि च ।
"विशेषाच्चैत्रमासस्य या तिथिः स्यात् सिताष्टमी ।
तस्यां यः पूजयेद्भक्त्या प्रसादयति मां ध्रुवम् ॥"
इति शाम्भवीतन्त्रे १४ पटलः ॥

वासयोगः, पुं, ( वासाय सुगन्धार्थं युज्यते इति । युज+घञ् ।) चूर्णम् । इत्यमरः ॥ "हे आबिर इति ख्याते । पटरस चोदे इत्यन्ये । चूर्ण्यन्ते पेष्यन्ते चूर्णानि चूर्ण प्रेरणे अल् । वासे सुरभीकरणे युज्यन्ते उपयुज्यन्ते इति घञि वासयोगः ।" इति तट्टीकायां भरतः ॥ तत्पर्य्यायः । गन्धचूर्णम् २ पटवासम् ३ चूर्णकम् ४ । इति शब्दरत्नावली ॥

वासरः, पुं क्ली, ( वासयतीति । वस्+णिच्+ "अर्त्तिकमिभ्रमिचमिदेविवासिभ्यश्चित् ।" उणा० ३ । १३२ । इति अरः । ) दिवसः । इत्यमरः ॥ ( यथा, कथासरित्सागरे । ४ । २३ ।
"प्रवृत्ते चावयोर्वादे प्रयाताः सप्त वासराः ।")
नागभेदे, पुं । इति मेदिनी । रे, २१३ ॥

वासवः, पुं, ( वसुरेव । प्रज्ञाद्यण् । ) इन्द्रः । इत्यमरः ॥ ( यथा, महाभारते । ३ । ४३ । २२ ।
"सहस्राक्षनियोगात् स पार्थः शक्रासनं गतः ।
अध्यक्रामदमेयात्मा द्वितीय इव वासवः ॥")

वासवी, स्त्री, ( वसोरपत्यं स्त्री । वसु+अण् । ङीप् । ) व्यासमाता । यथा,—
"व्यासस्याम्बा सत्यवती वासवी गन्धकालिका ।
योजनगन्धा दासेयी शालं कायनजीवसूः ॥",
इति हेमचन्द्रः ॥
( यथा, महाभारते । १ । ६३ । ७० ।
"दिव्यां तां वासवीं कन्यां रम्भोरुं मुनिपुङ्गवः ।
सङ्गमं मम कल्याणि ! कुरुष्वेत्यभ्यभाषत ॥")

वाससज्जा, स्त्री, (वासं गृहं सज्जयतीति । सज्ज+णिच्+अण् । टाप् । ) नायिकाभेदः । यथा,
"खण्डितोत्कण्ठिता लब्धा तथा प्रोषितभर्त्तृका ।
कलहान्तरिता वाससज्जा स्वाधीनभर्त्तृका ॥
अभिसारिकाप्यष्टौ ता बन्धक्यां पांशुलासती ॥"
इति जटाधरः ॥
अस्या विवरणं वासकसज्जाशब्दे द्रष्टव्यम् ॥

वासा, स्त्री, ( वासयतीति । वस्+णिच्+अच् । टाप् ।) वासकः । इति शब्दरत्नावली ॥ (यथा, वैद्यके ।
"वासायां विद्यमानायामाशायां जीवितस्य च ।
रक्तपित्ती क्षयी कासी किमर्थमवसीदति ॥")

वासागारं, क्ली, (वासाय वासस्य वा आगारम् ।) वासगृहम् । तत्पर्य्यायः । भोगगृहम् २ कन्याटः ३